① त्रिकाल संध्या

पेज (3-5) = 3 21×10·7×0·1 c.m.

मेधाब्रह्मचेविनियोग: ओं ऋतंचसत्यंचाभी

इति श्री त्रिकालसंध्यासमाप्तं शुभमस्तु ओं श्री रामचंन्द्रायनमः

Note→
पेज फटे हुये है।

② पेज = 1 (६) 25 × 0.7 × 0.1 c.m.

ओं श्री गणेसायनमः अथातश्वरणाव्यूहंव्याख्यास्यामः तत्रसामवेदस्य किल सहस्रभेदा भवंति राणायनीयाः

... राणायनीनाम सप्तभेदा भवंति राणायनीया: सा·

Note→ पेज फटा हुआ है।

२ अघमर्षणे विनियोगः॥ ओं ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत ततो रात्र्यजायत ततः
समुद्रो अर्णवः॥ समुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मि
षतो वशी॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चांतरिक्षमथो स्वः॥ अ
घमर्षणाम्भो निक्षिपेत्॥ आचम्य मंत्र॥ ओं अंतश्चरसीति तिरश्चीन ऋषिः अनुष्टप्छंदः
आपो देवता आचमने विनियोगः॥ ओं अंतश्चरसि भूतेषु गुहायां विश्वतो मुखः त्वं यज्ञ
स्त्वं वषट्कार आपो ज्योतिरसोमृतं॥ इत्याचमनं॥ अथार्घ्या गायत्री मंत्रेण अंज
लित्रयं आदित्याभिमुखः क्षिपेत्॥ अथोपस्थानं॥ ओं उदुत्यमिति प्रस्कण्व ऋषिर्गा
यत्री छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः॥ ओं उदुत्यं जातवेदसं देवं वहंति केतवः॥ दृशे
विश्वाय सूर्यं॥ ओं चित्रं देवानामिति कौत्स ऋषिस्त्रिष्टुप्छंदः सूर्यो देवता सूर्योपस्थाने वि
नियोगः॥ ओं चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी

अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ ॐ आदितिनामिति वसिष्ठ ऋषिः अनुष्टुप्छंदः
सूर्यो देवता सूर्योपस्थाने विनियोगः ॐ आदित्यनावमारोहं पूरणां परिपाहि नौ ॥ आच्छि
शं पारयिष्णी शतारिच्यं स्वस्तये ॥ ॐ नम आदित्येति वसिष्ठ ऋषिः अनुष्टुप्छंदः सूर्यो दे
वता सूर्योपस्थाने विनियोगः ॐ नम आदित्याय ३ ॥ इति त्रिः ॥ ॐ उद्यंतं त्वेति वसिष्ठ ऋषिर्यजुः
सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ उद्यंतं त्वादित्यानुदियासं ॥ इति प्रातः ॥ ॐ प्रतिति
ष्ठंतं त्वेति वसिष्ठ ऋषिर्यजुः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ प्रतितिष्ठंतं त्वादित्यानुप्रति
तिष्ठासं ॥ इति सायं ॥ मध्याह्ने तु ऋकत्रयमधिकं ॥ तत्र आयं गौरिति सार्पराज्ञ ऋषिर्गायत्री छं
दः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ॥ पितरं
च प्रयन्त्स्वः ॥ ॐ अपत्येति प्रस्कण्व ऋषिर्गायत्रीछंदः सूर्यो देवता सूर्योपस्थाने नियोगः ॥ ॐ
अपत्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः सूराय विश्वचक्षसे ॥ ॐ तरणिरिति विश्वामित्र ॥ ३ ॥

ऋषिर्गायत्रीछंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ तरणिर्विश्वदर्शतो ज्योतिष्कृ
दसि सूर्य विश्वमाभासि रोचनं ॥ ॐ उद्घामेषिरितिप्रस्कंण्व ऋषिर्गायत्रीछंदः सूर्यो देवता
सूर्योपस्थाने विनियोगः ॐ उद्घामेषि रजः पृथ्वाहामिमानो अक्तुभिः ॥ पश्यंजन्मासूर्य ॥ प
तस्य षट्कस्योपरि विभ्राडीदीक्षपाजपेत् ॥ विभ्राडुट्टहत् ॥ तवाहृट्टंसा ॥ वाममहं अस्मि ॥
इद्रमिद्देवतातये ॥ आयंतइवेति पंचभिर्मंत्रैश्चेतैर्नदिवाकीर्त्यैनोपस्थानं कुर्यात् ॥ अथ जप
विधानं ॥ तत्र स्थले शुक्कवासाः सूर्यसन्मुखः प्रातर्मध्याह्ने चोपस्थितः सायं तूपविष्ट एवं कुर्या
त् ॥ ॐ भूः हृदयाय नमः ॥ ॐ भुवः शिरसे स्वाहा ॥ ॐ स्वः शिखायै वौषट् ॥ ॐ तत्सवितुरिति क
वचाय हुं ॥ ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् ॥ ॐ धियो यो नः प्रचोदयादित्यस्त्राय फट् ॥
अथ ध्यानं ॥ प्रातः संध्या सरक्ताररक्तपद्मासस्यारक्ताहूं वरधरा रक्तवर्णी रक्तमाल्या रक्तगं
ग धानुलेपना चतुर्मुखी चतुर्भुजा द्विनेत्रा दंडाजमाला कमंडलस्रुक्स्रुवधारिणी सर्वाभरणा ॥

भूषिता गायत्री ब्राह्मी कौमारी हंसवाहिनी ऋग्वेदसंहिता ब्रह्मदेवत्या त्रिपदा गायत्री षट्कुक्षिः पंचशीर्षा अग्निमुखो रुद्रशिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनसगोत्रा रक्तवर्णा ब्रह्मलोका मे विनियोगः॥ ततः गायत्री मावाहयेत्॥ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनी॥ गायत्री च्छंदसां मातर्ब्रह्मयोने नमोस्तु ते॥ इति प्रातःसंध्याध्यानं॥ अथ मध्याह्नध्यानं॥ मध्याह्नसंध्या श्वेता श्वेतपद्मासनस्था श्वेतांबरधरा श्वेतवर्णा श्वेतमाल्या श्वेतगंधानुलेपना पंचमुखी दशभुजा त्रिनेत्रा त्रिशूलाहमालाकमंडलुकपालधारिणी सर्वाभरणभूषिता सावित्री रौद्री यौवनी वृषभवाहिनी यजुर्वेदसंहिता रुद्रदेवत्या त्रिपदा सावित्री षट्कुक्षिः पंचशीर्षा अग्निमुखा रुद्रशिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनसगोत्रा श्वेतवर्णा आत्मानो विनियोगः॥ इति ध्यानं॥ [illegible] आवाहनं॥ आगच्छ वरदे देवि जप्ये मे संनिधिं कुरु॥ गायंतं त्रायते यस्मात् गायत्री त्वं ततः स्मृता॥ आगच्छ वरदे देवि त्र्यक्षरे रुद्रवादिनी सावित्री च्छंदसां॥ ६॥

प्रासः
स्त्री
ची

ता च प्रतिगृह्णातु मे जपं॥ इति [illegible]ं कालध्यानं॥ ॐ सायं संध्याकृष्णा कृष्णवर्णा कृष्णपट्टवासः
नस्याकृष्णां वरधराकृष्णगंधानुलेपनाकृष्णमाल्याराकमुखी चतुर्भुजा द्विनेत्रा शंखधारिणी
व. द्वावेष्णवी गरुडवाहिनी सामवेदसंहिता विष्णुदेवत्या त्रिपदा सरस्वती षट्कुक्षीः पंचशीर्षी
अग्निमुखा रुद्रशिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनसगोत्री कृष्णवर्णा मोदेत्तोते विनियोगः
॥ आवाहनं॥ ततः सरस्वतीमावाहयेत॥ आगच्छ वरदे देवि जपे मे सन्निधिं कुरु॥ गायंतं त्रायते
तस्माद्गायत्री त्वं ततः स्मृता॥ आगच्छ वरदे देवि त्र्यक्षरे विष्णुवादिनी सरस्वती वेदमाता च प्रतिगृ
ह्णातु मे जपं॥ अथ मुद्रा॥ शुंमुखं च संपुटं चैव विततं विस्तृतं तथा द्विमुखं त्रिमुखं चैव चतुःपंचमुखं त
था॥ षण्मुखाधोमुखं चैव व्यापकांजलिकं तथा शकटं यमपाशं च ग्रंथितं सन्मुखोन्मुखं॥ प्रल
वं मुष्टिकं चैव मत्स्यः कूर्मो वराहकं सिंहाक्रांतं महाक्रांतं मुद्गरं पल्लवं तथा॥ एता मुद्राश्चतुर्विंशा
गायत्र्यां सुप्रतिष्ठिता॥ इति मुद्रा न जानाति तत्सर्वं निष्फलं भवेत॥ ॐ गायत्र्यास्मीति विमल [illegible]

॥५॥ वृः परमात्मा देवता गायत्र्युपस्थाने विनियोगः॥ ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःप
द्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे इति सर्लोजालिं भूमो निःक्षिप्य ज
पं कुर्यात्॥ ॐ विश्वामित्र ऋषिर्गायत्री छंदः सविता देवता जपे विनियोगः॥ अर्कः अर्कज्यो
तिरहं शिवः शिवज्योतिरहं ब्रह्मः ब्रह्मज्योतिरहं वसिष्ठशापात् गायत्री मुक्ता भव मुंचमुंच
प्रति मुंच त॥ ॐ भूः भूर्विः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि धियो यो नः॥ प्रचो
दयात॥ शताक्षरावका शतावृत्तया जपेत॥ अनेनैतावत्तं हवायां गायत्री जपेन मयाहृते नब्रह्म
स्वरूपीप्रीणातु प्रातरः॥ रुद्रस्वरूपी प्रीणातु मध्याह्न॥ विष्णुस्वरूपी प्रीणातु सायं॥ ॐ
प्रजापति ऋषिः अनुष्टुप् छंदः संध्या देवता मासीने विनियोगः ॐ उत्तरे शिखरे जाता भू
म्यां पर्वत मूर्द्धनि ब्रह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथा सुखं॥ आचमनं॥ विष्णुर्विष्णुर्वि
ष्णुः वाक्प्राणः प्राणः चक्षुश्चक्षुः श्रोत्रं श्रोत्रं यशो बलं॥ इति संध्या स्नानविधिः॥५॥

7

जगत्पते ॥ अनुकंपय मां भक्त्या गृहाणार्घ्यं दिवाकरः श्रीसूर्याय नमः ॥ इति त्रिकालसं
ध्यासमाप्तं ॥ शुभमस्तु ॥ ॐ श्रीरामचंद्राय नमः ॥ ॐ श्रीगणेशाय नमः अथातश्चरणव्यूहं व्याख्यास्या
मस्तत्र निरुक्तं चातुर्विध्यं चत्वारो वेदा विज्ञाता निभवंति ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति तत्र ऋग्वेदस्याष्टौ स्थानानि
भवंति चर्चा श्रावकश्चर्चकः श्रवणीयपारः क्रमपारः क्रमचटः क्रमजटः क्रमदंडश्चेति चतुःपारायणमेतेषां शाखाः पंच
विधा भवंति शाकला बाष्कला आश्वलायनाः शांखायना मांडूकायनाश्चेति तेषामध्ययनमध्यायाश्चतुःषष्टि मंडलानि
दशैव तु एकर्चैकद्वार्शस्याद्देकप्यनवकस्तथा द्वौ वर्गौ तद्वच्चौ ज्ञेयो त्रीणि ऋक् च शतं स्मृतम् कर्त्तीर्णा परिसंख्यातं दशसहस्रे
चतुरुत्तरं ऋचां दश सहस्राणि ऋचां पञ्चशतानि च ऋचामशीतिपादश्चैतत्पारायणमुच्यते १ यजुर्वेदस्य षडशीतिर्भेदा भवं
ति तत्र चरकाणां द्वादश विधा भवन्ति चरकाः आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीयाः वार्तांतवीयाः श्वेताश्वत
राश्चौपमन्यवः पातांडिनेया मैत्रायणीयाश्चेति तत्र मैत्रायणीयानाम् षड्भेदा भवंति मानवा वाराहा दुंदुभाश्छागलेया
हारिद्रवीयाः श्यामायनीयाश्चेति तेषामध्ययनं द्वे सहस्रे शते न्यूने मंत्रे वाजसनेयके ऋग्गणः परिसंख्यातस्ततोन्यानि यजूं
षि अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकं च पादश्च तत्प्रमाणम् यजुषां ह केवलं सवालखिल्यं ससुपर्णं सप्रक्ति
यं ब्राह्मणं च चतुर्गुणम् तत्र तैत्तिरीयकानाम् द्विभेदा भवन्त्यौखेयाः खांडिकेयाश्चेति तत्र खांडिकेयानाम् पंचभेदा भवंति
कालेता शाट्यायनी हिरण्यकेशी भारद्वाज्यापस्तम्बी चेति तेषामध्ययनमष्टादश यजुः सहस्राण्यधीत्य शाखापारो भ

पी०
चरण

8

वति तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति षडङ्गान्यधीत्य षडङ्गविद्भवति त्रिगुणं प
ठ्यते यत्र मंत्रवेदः सब्राह्मणयोः सह यजुर्वेदस्य विज्ञेयः शेषाः स्युरांतराः स्मृताः शिक्षाकल्पो व्याकरणं निरुक्तं छंदो ज्यो
तिषमिति षडङ्गानि छंदः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते शिक्षा घ्राणं तु
वेदस्य मुखं व्याकरणं स्मृतम् तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते तथा प्रतिपदमनुपदं छंदो भाषा धर्मो मीमांसा न्या
यस्तर्क इत्युपाङ्गानि तत्र परिशिष्टानि भवंति यूपलक्षणं छागलक्षणं प्रतिज्ञानुवाकः शाख्याचरणव्यूहः श्राद्धकल्पशु
ल्बानि पार्षदमृग्यजूंषीष्टिकापूर्णं प्रवराध्यायोक्थशास्त्रं क्रतुसंख्या निगमो यज्ञपार्श्वं होत्रिकं प्रसवोत्थानं कूर्मल
क्षणमित्यष्टादश परिशिष्टानि भवंति तत्र कठानां योगायेन विप्रोषास्तत्र प्राच्योदीच्य नैरृत्य वाजसनेया नाम पंचद
श भेदा भवंति जाबाला बौद्धाकान्वा माध्यंदिनेयाः शाकेयास्तापनीयाः कापालाः पौण्ड्रवत्सा आवटिकाः परमा
वटिकाः पाराशरा वैणेया वैधेया ऽद्धा बौधेयाश्चेति तेषामध्ययनं शा[illegible]क्तिकं प्रवचनीयाश्चेति मंत्रब्राह्मणकल्पानाम
ङ्गानां यजुःसामचांषडंयः प्रतिभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते २ सामवेदस्य किल सहस्रभेदमासीत्तेष्वनध्याये
ष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः [illegible] शेषान्व्याख्यास्यामस्तत्र राणायनीया नाम सप्तभेदा भवंति राणायनीयाः सा ६